Puspa Shrestha
Best Quality Resource Site for Class 11 And 12 Students
(Based on Updated Curriculum 2077)

Puspa Shrestha
Best Quality Resource Site for Class 11 And 12 Students (Based on Updated Curriculum 2077)
puspas.com.np
PDF
PDF Collections
Notes
Books
Model Questions

This PDF was downloaded from puspas.com.np

Visit our website for more materials.

puspas.com.np

Follow us on:
AR Dinesh
puspas.com.np
Puspa Shrestha

**३६. संस्कृतरचना**

## विशिष्टीकरणतालिका

**कक्षा : १२** **पूर्णाङ्काः ७५**
**समयः घण्टात्रयम्**

| क्र. स. | विषयक्षेत्रम् (पठनं लेखनञ्च) | प्रश्नप्रकृतिः | ज्ञानम् (१x१= १) | | | बोधः (१x१= १) | | | शिल्पम् (१x५= ५) | | | उच्चदक्षता (१x८= ८) | | | पृष्ट्व्याः प्रश्न-सङ्ख्या | अङ्क-भारः | स्पष्टीकरणम् |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | क | ख | ग | क | ख | ग | क | ख | ग | क | ख | ग | | | |
| १. | दृष्टांश-गद्यम् | ज्ञान-प्रयोगात्मकम् | १ | - | - | - | - | - | - | ५ | - | - | - | - | २ | ६ | **ज्ञानबोधक्षेत्रतः** विषयक्षेत्रसम्बद्ध एकः प्रश्नः । **शिल्पक्षेत्रतः** पठितगद्यतोऽनुच्छेदं प्रदाय सारांशलेखनसम्बद्धो विशिष्टवाक्यं प्रदाय तात्पर्यप्रकाशनसम्बद्धो वा एकः प्रश्नः । |
| २. | अदृष्टांश-गद्यम् | ज्ञान-बोधात्मकम् | १ | - | - | २ | - | - | - | - | - | - | - | - | ३ | ३ | **ज्ञानबोधक्षेत्रतः** अदृष्टगद्यांशं प्रदाय तदनुवर्तिनां त्रयाणामुपप्रश्नानामुत्तरलेखनसम्बद्धाः त्रयप्रश्नाः । |
| ३. | वर्णक्रम-निर्धारणम् | बोधात्मकम् | - | - | - | ३ | - | - | - | - | - | - | - | - | ३ | ३ | **ज्ञानबोधक्षेत्रतः** षट् पदानि प्रदाय कोशप्रविष्टिक्रमानुसारेण सूचीकरणसम्बद्ध एकः प्रश्नः |
| ४. | वाक्यान्तरणम् | बोध-प्रयोगात्मकम् | - | - | - | १ | - | - | - | ५ | - | - | - | - | २ | ६ | **ज्ञानबोधक्षेत्रतः** लिङ्ग-पुरुषाधारेण वाक्यान्तरणसम्बद्ध एकः प्रश्नः । **शिल्पक्षेत्रतः** विध्यर्थ-निषेधार्थ-काल-वाच्य-वचनाधारेण वाक्यान्तरणसम्बद्धाः चत्वारः प्रश्नाः । |
| ५. | प्रत्यय-प्रयोगः | ज्ञान-प्रयोग-उच्च- | १ | - | - | - | - | - | - | १० | - | - | - | ८ | ४ | १९ | **ज्ञानबोधक्षेत्रतः** प्रकृतिप्रत्ययविभाग-प्रकृतिप्रत्ययसंयोजनसम्बद्ध एकः प्रश्नः । |

CURRICULUM DEVELOPMENT CENTRE

| | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | दक्षतात्मकम् | | | | | | | | | | | | | | | **शिल्पक्षेत्रतः**<br>प्रदत्तानुच्छेदतः कृत्तद्धितप्रत्ययान्तपदान्यन्विष्य तेषां प्रकृतिप्रत्ययविभागसम्बद्ध एकः प्रश्नः, प्रदत्तानां पदानां प्रत्ययान्तरणेन शब्दस्वरूपपरिवर्तनशिल्पप्रदर्शनसम्बद्ध एकः प्रश्नः, कोष्ठस्थप्रकृतिप्रत्ययसंकेतमनुसृत्य रिक्तस्थानपूरणपूर्वकमनुच्छेदरचनासम्बद्ध एकः प्रश्नः<br>**उच्चदक्षताक्षेत्रतः**<br>शतृ-शानच्-ण्वुल्-तृच्-ठक्-प्रत्ययान्तविशेष्यनिघ्नशब्दस्य त्रिषु लिङ्गेष्वेव रूपावलिलेखनसम्बद्ध एकः प्रश्नः ।<br>**अथवा**<br>चतुर्ण्णां प्रत्ययान्तपदानां वाक्येषु प्रयोगं प्रदर्श्य तेषां लिङ्गान्तरणसम्बद्ध एकः प्रश्नः । |
| ६. | समास-प्रयोगः | प्रयोग-उच्च-दक्षतात्मकम् | - | - | - | - | - | - | - | १० | - | - | - | ८ | ३ | १८ | **शिल्पक्षेत्रतः**<br>विग्रहवाक्यात्मकानुच्छेदस्य समसनपूर्वकं पुनर्लेखनसम्बद्ध एकः प्रश्नः, समस्तपदानां सविग्रहं समासनामलेखनसम्बद्ध एकः प्रश्नः, समस्तपदानां प्रयोगेण गद्यांशलेखनसम्बद्ध एकः प्रश्नः ।<br>**उच्चदक्षताक्षेत्रतः**<br>सोदाहरणं समासस्वरूप-समासप्रकार-विग्रहस्वरूप-विग्रहप्रकार-बहुव्रीहिस्वरूप-द्वन्द्वस्वरूपसम्बद्धः कयोश्विद्द्वयोः समासयोः पार्थक्यप्रदर्शनसम्बद्धो वा एकः प्रश्नः ।<br>**अथवा**<br>अदृष्टगद्यांशतः अष्टौ समस्तपदान्यन्विष्य |

CURRICULUM DEVELOPMENT CENTRE

| | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | | | | | | | तेषां विग्रहवाक्यसमासनामलेखनसम्बद्ध एकः प्रश्नः । |
| ७. | अनुवादः | ज्ञान-प्रयोगपरकम् | १ | - | - | - | - | - | - | ५ | - | - | - | - | २ | ६ | **ज्ञानबोधक्षेत्रतः**<br>विषयक्षेत्रसम्बद्ध एकः प्रश्नः ।<br>**शिल्पक्षत्रेतः**<br>द्वयोः संस्कृतवाक्ययोर्नेपालीभाषायां त्रयाणां नेपालीभाषाया वाक्यानां च संस्कृतेऽनुवादसम्बद्ध एकः प्रश्नः । |
| ८. | रचना | ज्ञान-सिर्जनात्मकम् | १ | - | - | - | - | - | - | ५ | - | - | - | - | २ | ६ | **ज्ञानबोधक्षेत्रतः**<br>विषयक्षेत्रसम्बद्ध एकः प्रश्नः ।<br>**शिल्पक्षेत्रतः**<br>निर्णयपुस्तिकालेखनसम्बद्ध एकः प्रश्नः ।<br>**अथवा**<br>प्राशासनिकटिप्पणीलेखनसम्बद्ध एकः प्रश्नः । |
| ९. | बोधाभिव्यक्तिः | विश्लेषण-परकम् | - | - | - | - | - | - | - | - | - | - | - | ८ | १ | ८ | **उच्चदक्षताक्षेत्रतः**<br>प्रकृतिप्रधानपद्यस्य प्रसङ्गान्वयनिदर्शन-सरलार्थलेखन-भावार्थप्रकाशन-पर्यायप्रदर्शनसम्बद्ध एकः प्रश्नः ।<br>**अथवा**<br>विद्यामहिमप्रकाशकपद्यस्य विषयप्रकाशनसम्बद्ध एकः प्रश्नः ।<br>**अथवा**<br>रूपकात् प्रधानचरित्रवैशिष्ट्यप्रकाशन-सन्देशलेखन-संवादवैशिष्ट्यनिरूपणसम्बद्ध एकः प्रश्नः । |
| योगः | | | ५ | | | ६ | | | | ४० | | | | २४ | २२ | ७५ | |

**द्रष्टव्यः** 'क' इत्यनेन अतिलघुप्रश्नो बोध्यः ।
'ख' इत्यनेन लघुप्रश्नो बोध्यः ।
'ग' इत्यनेन सामान्यतया विस्तृतोत्तरापेक्षी (व्याख्यात्मकः) प्रश्नो बोध्यः।

CURRICULUM DEVELOPMENT CENTRE

**निदर्शनप्रश्नपत्रम्**
**संस्कृतरचना**

**कक्षा** १२ **पूर्णाङ्का:** ७५
**समय:** सपादघण्टाद्वयम्

**१. अधस्तनानां प्रश्नानामुत्तराणि लिखत** **१×५ = ५**

क) शुकनासः कमुपादिशत् ?
ख) 'धृतराष्ट्र उवाच' इति वाक्यं मध्यमपुरुषे परिवर्तयत ।
ग) 'मीमांसकः' इत्यस्य प्रकृतिप्रत्यविभागं कुरुत ।
घ) रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणस्य का विभक्तिः ?
ङ) निर्णयपुस्तिकायां किं लिख्यते ?

**२. अधस्तनं गद्यं पठित्वा प्रदत्तानां प्रश्नानामुत्तराणि लिखत** **३**

वैदिककालादारभ्य मध्यकालपर्यन्तं गद्यविकासस्येतिहासो नितरां मनोरमो विद्यते । गद्यस्य द्विविधं रूपं दृश्यते । तत्र एकं वैदिककालसाधारणम्, अपरञ्च आलापकारकं तथा लौकिकसंस्कृतस्य प्रौढिमत् समासबहुलवत् गाढबन्धवच्च गद्यम् । द्विविधयोरप्यनयोर्वैशिष्ट्यं सौन्दर्यं मोहकत्वञ्च विद्यत एव । वैदिकगद्ये साधारणानामल्पानां शब्दानामुपलम्भो यथा- 'ह' 'वै' 'उ' प्रभृतयो वाक्यालङ्काररूपेण प्रयुक्ताः सन्ति । एषां प्रयोगे वाक्येषु रोचकतायास्तथा सुन्दरतायाः समावेशो भवति । समासस्तु नाममात्रम्, उदाहरणानां तु बहुलतया प्रयोगः । उपमारूपकयोः कमनीयसन्निवेशेन हि विवदग्धदृष्ट्या वैदिकं गद्यं हृदयावर्जकम् ।

क) गद्यस्य द्विविधं रूपं कीदृशम् ?
ख) वैदिकं गद्यं किमर्थं हृदयावर्जकम् ?
ग) 'सौन्दर्यम्' इत्यस्य प्रकृतिप्रत्ययविभागं कुरुत ।

**३. अधस्तनानां शब्दानां कोशप्रविष्टिक्रमानुसारेण पुनर्लेखनं कुरुत** **३**

सकटान्न, सकम्पन, सकण्टक, सकट, सकम्प, सकण्ट

**४. प्रदत्तं गद्यांशमाधृत्य स्वभाषया लक्ष्म्याः स्वरूपं वर्णयत** **५**

आलोकयतु तावत् कल्याणाभिनिवेशो लक्ष्मीमेव प्रथमम् । इयं हि सुभटखड्गमण्डलोत्पल-वन-विभ्रम-भ्रमरी-लक्ष्मीः क्षीरसागरात् पारिजातपल्लवेभ्यो रागम्, इन्दुशकलादेकान्तवक्रताम्, उच्चैःश्रवशश्चञ्चलताम्, कालकूटान्मोहनशक्तिम्, मदिराया मदम्, कौस्तुभमणेरतिनैष्ठुर्यमित्येतानि सहवासपरिचयवशाद् विरहविनोदचिह्नानि गृहीत्वेवोद्गता । न ह्येवंविधमपरम् । अपरिचितमिह जगति किञ्चिदस्ति, यथेयमनार्या । लब्ध्वापि खलु दुःखेन परिपाल्यते । दृढगुणपाशसन्दान-निष्पन्दीकृतापि नश्यति ।

**५. कोष्ठस्थसङ्केतमनुसृत्य वाक्यान्तरणं कुरुत** **५**

क) संशयम् अनारुह्य नरो भद्राणि न पश्यति । (सामान्यभविष्यति)
ख) विद्वांसो वर्तमानेन कालेन प्रवर्तन्ते । (द्विवचने)
ग) तेऽद्य चलचित्रं द्रष्टुं चित्रागारं यान्तु । (निषेधार्थे)
घ) ताभ्योऽहं रोचे । (भाववाच्ये)
ङ) रामो राजमणिः सदा विजयते । (विध्यर्थे)

**६. प्रदत्तानुच्छेदतः पञ्च कृदन्तपदानि पञ्च तद्धितान्तपदानि चान्विष्य प्रकृतिप्रत्ययविभागं कुरुत ५**

ग्रामबहुलेऽस्माकं देशे कृषेः प्रधानता वर्तते । ग्रामीणाः प्रायेण कृषिकार्यं विधाय स्ववृत्तिं सञ्चालयन्ति । समये बीजादीनां प्राप्तिर्नभवति, आधुनिकानां प्रविधीनामभावो वर्तते, उपलब्धानां प्रविधीनां प्रयोगे ग्रामीणेषु दक्षत्वं नास्ति, वरिष्ठाः कृषिविदो ग्रामं न गच्छन्ति, उत्पादितानां वस्तूनां कृतेऽपि क्रेतारः समुचितं मूल्यं न

CURRICULUM DEVELOPMENT CENTRE

ददति । अतः कृषिकर्मणा वृत्तिसञ्चालने यतमानाः ग्रामीणाः काठिन्यम् अनुभवन्तः सन्ति । तेन ग्रामीणेष्वपि अधुना कृषिकर्मणि रुचिर्न दृश्यते । प्रायेणाधुना ग्रामीणा युवका विदेशं गताः सन्ति । परिश्रमिणो यदि स्वस्वेदबिन्दुभिर्वैदेशिकानां भूमेः सेचनं कुर्युस्तदाऽस्माकं देशस्य विकासः कथं सम्भवेत् । अतः केन्द्रीयेन सर्वकारेण सर्वप्रथमं कृषेर्विकासः विधेयः । कृषेर्विकासं विना देशस्य राष्ट्रियो विकासो न सम्भवति । कृषेर्विकासेनैव राष्ट्रस्थाः सर्वेऽपि जना वृत्तिमन्तो भवन्ति, राष्ट्रस्य गरिमा च वर्धते ।

**७. प्रकृतिप्रत्यययोगेन निष्पन्नं पदं लिखत** **५**

क) धातु + वति ख) भू + उकञ् ग) गङ्गा + ढक्

घ) दृश् + तृच् ङ) भिक्ष् + उ च) किम् + तसिल्

छ) यद् + थाल् ज) शुष् + क्तवतु झ) पच् + अच्

ञ) युज् + घञ्

**८. द्वन्द्वबहुव्रीहिसमासाभ्यां समस्तानां पञ्चानां पदानां प्रयोगेण स्वपरिवारस्य वर्णनं कृत्वा एकमनुच्छेदं रचयत ।** **५**

**९. अधस्तनानां समस्तपदानां विग्रहं प्रदर्शयत** **५**

क) कल्पितार्घाय ख) पराधीनवृत्तिः ग) धूमज्योतिःसलिलमरुताम्

घ) रामाभिधानम् ङ) निर्मर्यादः च) यथासुखम् छ) रामलक्ष्मणयोः

ज) प्रकटतिविविधसङ्क्रान्तिः झ) अप्रत्यक्षदर्शना ञ) कुटिलकष्टचेष्टासहस्रदारुणे

**१०. अधस्तनयोः प्रश्नयोरुत्तराणि प्रदत्त** **२ + ३ = ५**

**क) अधस्तनयोः संस्कृतवाक्ययोः नेपालिभाषायामनुवादं कुरुत**

अ) यः परदारेषु मातृवत्, परद्रव्येषु लोष्ठवत्, सर्वभूतेषु च आत्मवत् पश्यति, स एव पण्डितः अस्ति ।

आ) सुमहान्तानि शास्त्राणि धारयन्तो बहुश्रुता संशयानां छेत्तारोऽपि लोभमोहिताः सन्तः क्लिश्यन्ते ।

**ख) संस्कृतेऽनुवादं कुरुत**

अ) मेरा गुरुहरूले मलाई जीवनका लागि उपयोगी ज्ञान दिनुभएको थियो ।

आ) जो आफ्नो संस्कृति त्यागेर अर्काको संस्कृतिको अनुसरण गर्दछ, त्यसलाई धिक्कार छ ।

इ) विदेश गएका सबै युवाहरू फर्किएपछि देशको विकास हुनेछ ।

**११. विद्यालय-व्यवस्थापन-समितेरुपवेशेन विद्यालये सुसाङ्ख्यस्याध्यापनारम्भस्य निर्णयो विहितो वर्तते, तस्य उपवेशस्योपस्थितिनिर्णयादिकं निर्णयपुस्तिकायां कथं लिख्यते ? निदर्शनं प्रस्तुत ।**

**१२. गम्धातोः शतृप्रत्ययेन निष्पन्नस्य शब्दस्य त्रिष्वेव लिङ्गेषु सर्वाणि रूपाणि लिखत ।** **८**

**१३. द्वन्द्वसमासस्वरूपं निदर्श्य सोदाहरणं चार्थानां परिचयमुपस्थापयत ।** **८**

CURRICULUM DEVELOPMENT CENTRE

# Puspa Shrestha

Best Quality Resource Site for Class 11 And 12 Students
(Based on Updated Curriculum 2077)

---

Please subscribe to our YouTube Channel. Also, like and follow us on our Facebook Page.

---

Please check out the following post for downloading model questions of other subjects.

## Class 12 Model Question 2078 PDF (All Subjects) With Specification Grid

Dinesh Shrestha




---

Please email us at pdf-feedback@puspas.com.np if you have any suggestions or feedback.

**Follow us on:**

AR Dinesh puspas.com.np Puspa Shrestha